# Kundalini Stotram 2 Kandavasini Stotram

# કુણ્ડલિનીસ્તોત્રમ્ ૨ કન્દવાસિનીસ્તોત્રમ્

## Document Information

Text title : Kundalini Stotram 2 Kandavasini Stotram

File name : kuNDalinIstotram2.itx

Category : devii, ShaTchakrashakti, devI

Location : doc_devii

Transliterated by : staff of Muktabodha.org Mark S.G. Dyczkowski

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Description/comments : rudrayAmale uttaratantre 1 bhairava bhairavI sa.nvAde

Source : Rudrayamalam part 1 edited by Ram Prasad Tripathi and Sudhakar Malaviya

Acknowledge-Permission: Marjorie Woollacott, Ph.D., Digital Library Coordinator muktabodha.org

Latest update : February 16, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 16, 2020

*sanskritdocuments.org*

# કુણ્ડલિનીસ્તોત્રમ્ ૨ કન્દવાસિનીસ્તોત્રમ્

શ્રીઆનન્દભૈરવી ઉવાચ
અથ કાન્ત પ્રવક્ષ્યામિ શ‍ૃણુષ્વ મમ તત્ત્વતઃ ।
શક્તિઃ કુણ્ડલિની દેવી સર્વભેદનભેદિની ॥ ૩૨-૧॥

કલિકલ્મષહન્ત્રી ચ જગતાં મોક્ષદાયિની ।
તસ્યાઃ સ્તોત્રં તથા ધ્યાનં ન્યાસં મન્ત્રં શ‍ૃણુ પ્રભો ॥ ૩૨-૨॥

યસ્ય વિજ્ઞાનમાત્રેણ મૂલપદ્મે મનોલયઃ ।
ચૈતન્યાનન્દનિરતો ભવેત્ કુણ્ડલિસઙ્ગમાત્ ॥ ૩૨-૩॥

આકાશગામિનીં સિદ્ધિં દદાતિ કુણ્ડલી ભૃશમ્ ।
અમૃતાનન્દરૂપાભ્યાં કરોષિ પાલનં નૃણામ્ ॥ ૩૨-૪॥

કુણ્ડલિની-ધ્યાનમ્ ।
શ્વાસોચ્છ્વાસકલાભ્યાં ચ શરીરં ત્રિગુણાત્મકમ્ ।
પઞ્ચભૂતાવૃતા નિત્યં પઞ્ચાનિલા ભવેદ્ ધ્રુવમ્ ॥ ૩૨-૫॥

કોટિસૂર્યપ્રતીકાશાં નિરાલમ્બાં વિભાવયેત્ ।
સર્વસ્થિતાં જ્ઞાનરૂપાં શ્વાસોચ્છ્વાસનિવાસિનીમ્ ॥ ૩૨-૬॥

સ્વયમ્ભૂકુસુમોત્પન્નાં ધ્યાનજ્ઞાનપ્રકાશિનીમ્ ।
મોક્ષદાં શક્તિદાં નિત્યાં નિત્યજ્ઞાનસ્વરૂપિણીમ્ ॥ ૩૨-૭॥

લોલાં લીલાધરાં સર્વાં શુદ્ધજ્ઞાનપ્રકાશિનીમ્ ।
કોટિકાલાનલસમાં વિદ્યુત્કોટિમહૌજસામ્ ॥ ૩૨-૮॥

તેજસા વ્યાપ્તકિરણાં મૂલાદૂર્ધ્વપ્રકાશિનીમ્ ।
અષ્ટલોકપ્રકાશાઢ્યાં ફુલ્લેન્દીવરલોચનામ્ ॥ ૩૨-૯॥

સર્વમુખીં સર્વહસ્તાં સર્વપાદામ્બુજસ્થિતામ્ ।
મૂલાદિબ્રહ્મરન્ધ્રાન્તસ્થાનલોકપ્રકાશિનીમ્ ॥ ૩૨-૧૦॥

ત્રિભાષાં સર્વભક્ષાં ચ શ્વાસનિર્ગમપાલિનીમ્ ।
લલિતાં સુન્દરીં નીલાં કુણ્ડલીં કુણ્ડલાકૃતિમ્ ॥ ૩૨-૧૧॥

અભૂમણ્ડલબાહ્યસ્થાં બાહ્યજ્ઞાનપ્રકાશિનીમ્ ।
નાગિનીં નાગભૂષાઢ્યાં ભયાનકકલેવરામ્ ॥ ૩૨-૧૨॥

યોગિજ્ઞેયાં શુદ્ધરૂપાં વિરલામૂર્ધ્વગામિનીમ્ ।
એવં ધ્યાત્વા મૂલપદ્મે કુણ્ડલીં પરદેવતામ્ ॥ ૩૨-૧૩॥

ભાવસિદ્ધિર્ભવેત્ ક્ષિપ્રં કુણ્ડલીભાવનાદિહ ।
તતો માનસજાપં હિ માનસં હોમતર્પણમ્ ॥ ૩૨-૧૪॥

અભિષેકં મુદા કૃત્વા પ્રાતઃ કાલે પુનઃ પુનઃ
પ્રાણાયામં તતઃ કૃત્વા સ્તોત્રં ચ કવચં પઠેત્ ॥ ૩૨-૧૫॥

એતત્સ્તોત્રસ્ય પાઠેન સ્વયં સિદ્ધાન્તવિદ્ભવેત્ ।
કુણ્ડલી સુકૃપા તસ્ય માસાદ્ભવતિ નિશ્ચિતમ્ ॥ ૩૨-૧૬॥

નિદ્રાદોષાદિકં ત્યક્ત્વા પ્રકાશ્યાહં શરીરકે ।
અહં દાત્રી સુયોગાનામધિપાહં જગત્ત્રયે ॥ ૩૨-૧૭॥

અહં કર્મ અહં ધર્મઃ અહં દેવી ચ કુણ્ડલી ।
યો જાનાતિ મહાવીર કુણ્ડલીરૂપસેવનાત્ ॥ ૩૨-૧૮॥

ઇતિ તં પાત્રકં કર્તુમવતીર્ણાસ્મિ સર્વદા ।
અત એવ પરં મન્ત્રં કુણ્ડલિન્યાઃ સ્તવં શુભમ્ ॥ ૩૨-૧૯॥

પ્રપઠેત્ સર્વદા દેહે યદિ વશ્યા ન કુણ્ડલી ।
તાવત્ કાલં જપં કુર્યાદ્ યાવત્ સિદ્ધિર્ન જાયતે ॥ ૩૨-૨૦॥

કુણ્ડલિનીસ્તોત્રમ્ –
આધારે પરદેવતા ભવનતાધોકુણ્ડલી દેવતા ।
દેવાનામધિદેવતા ત્રિજગતામાનન્દપુઞ્જસ્થિતા ॥ ૩૨-૨૧॥

મૂલાધારનિવાસિની ત્રિરમણી યા જ્ઞાનિની માલિની ।
સા મે માતૃમનુસ્થિતા કુલપથાનન્દૈકબીજાનના ॥ ૩૨-૨૨॥

સર્વાઙ્ગસ્થિતિકારિણી સુરગણાનન્દૈકચિન્હા શિવા ।
વીરેન્દ્રા નવકામિની વચનદા શ્રીમાનદા જ્ઞાનદા ॥ ૩૨-૨૩॥

સાનન્દા ઘનનન્દિની ઘનગણા છિન્ના ભવા યોગિની ।

ધીરા ધૈર્યવતી સમાપ્તવિષયા શ્રીમઙ્ગલી કુણ્ડલી ॥ ૩૨-૨૪॥

સર્વાકારનિવાસિની જયધરાધારાધરસ્થાગયા ।
ગીતા ગોધનવર્દ્ધિની ગુરુમયી જ્ઞાનપ્રિયા ગોધના ॥ ૩૨-૨૫॥

ગાર્હાગ્નિસ્થિતિ ચન્દ્રિકા સુલતિકા જાડ્યાપહા રાગદા ।
દારા ગોધનકારિણી મૃગમના બ્રહ્માણ્ડમાર્ગોજ્જ્વલા ॥ ૩૨-૨૬॥

માતા માનસગોચરા હરિચરા સિંહાસનકારણા ।
યામા દાસગણેશ્વરી ગુણવતી છાયાપથસ્થાયિની ॥ ૩૨-૨૭॥

નિદ્રા ક્ષુબ્ધજનપિરયા વરતૃષા ભાષાવિશેષસ્થિતા ।
સ્થિત્યન્તપ્રલયાપહા નરશિરોમાલાધરા કુણ્ડલી ॥ ૩૨-૨૮॥

ગાઙ્ગેશી યમુનેશ્વરી ગુરુતરી ગોદાવરી ભાસ્કરી ।
ભક્તાર્તિક્ષયકારિણી સમશિવં યથૈકભાવાન્વિતા ॥ ૩૨-૨૯॥

ત્વં શીઘ્રં કુરુ કૌલિકે મમ શિરોરન્ધ્રં તદબ્જં મુદા ।
તત્પત્રસ્થિતદૈવતં કુલવતી માતૃસ્થલં પાહિકમ્ ॥ ૩૨-૩૦॥

ભાલોર્દ્ધ્વે ધવલા કલારસકલા કાલાગ્નિજાલોજ્જ્વલા ।
ફેરુપ્રાણનિકેતને ગુરુતરા ગુર્વી સુગુર્વી સુરા ॥ ૩૨-૩૧॥

હાલોલ્લાસસમોદયા યતિનયા માયા જગત્તારિણી ।
નિદ્રામૈથુનનાશિની મમ હરા મોહાપહા પાતુકમ્ ॥ ૩૨-૩૨॥

ભાલં નીલતનુસ્થિતા મતિમતામર્થપ્રિયા મૈથિલી ।
ભાલાનન્દકરા મહાપ્રિયજના પદ્માનના કોમલા ॥ ૩૨-૩૩॥

નાનારઙ્ગસુપીઠદેશવસના સિદ્ધાસના ઘોષણા ।
ત્રાણસ્થાવરરૂપિણી કલિહની શ્રીકુણ્ડલી પાતુકમ્ ॥ ૩૨-૩૪॥

ભ્રૂમધ્યં બગલામુખી શશિમુખી વિદ્યામુખી સમ્મુખી ।
નાગાખ્યા નગવાહિની મહિષહા પઞ્ચાનનસ્થાયિની ॥ ૩૨-૩૫॥

પારાવાર વિહારહેતુસફરી સેતુપ્રકારા પરા ।
કાશીવાસિનમીશ્વરં પ્રતિદિનં શ્રીકુણ્ડલી પાતુકમ્ ॥ ૩૨-૩૬॥

યા કુણ્ડોદ્ભવસારપાનનિરતા મોહાદિદોષાપહા ।
સા નેત્રત્રયમમ્બિકા સુવલિકા શ્રીકાલિકા કૌલિકા ॥ ૩૨-૩૭॥

કાકસ્થા દ્વિકચઞ્ચુપારણકરી સંજ્ઞાકરી સુન્દરી ।
મે પાતુ પ્રિયયા તયા વિશદયા સચ્છાયયા છાદિતા ॥ ૩૨-૩૮॥

શ્રીકુણ્ડે રણચણ્ડિકા સુરતિકા કઙ્કાલિકા બાલિકા ।
સાકાશા પરિવર્જિતા સુગતિકા જ્ઞાનોર્મિકા ચોત્સુકા ॥ ૩૨-૩૯॥

સૌકાસૂક્ષ્મસુખપ્રિયા ગુણનિકા દીક્ષા ચ સૂક્ષ્માખ્યકા ।
મામન્ધં મમ કન્દવાસિનિ શિવે સન્ત્રાહિ સન્ત્રાહિકમ્ ॥ ૩૨-૪૦॥

એતત્સ્તોત્રં પઠિત્વા ત્રિભુવનપવનં પાવનં લૌકિકાનામ્ ।
રાજા સ્યાત્ કિલ્બિષાગ્નિઃ ક્રતુપતિરિહ યઃ ક્ષેમદં યોગિનાં વા ॥ ૩૨-૪૧॥

સર્વેશઃ સર્વકર્તા ભવતિ નિજગૃહે યોગયોગાઙ્ગવક્તા ।
શાક્તઃ શૈવઃ સ એકઃ પરમપુરુષગો નિર્મલાત્મા મહાત્મા ॥ ૩૨-૪૨॥

પ્રણવેન પુટિતં કૃત્વા યઃ સ્તૌતિ નિયતઃ શુચિઃ ।
સ ભવેત્ કુણ્ડલીપુત્રો ભૂતલે નાત્ર સંશયઃ ॥ ૩૨-૪૩॥

ઇતિ શ્રીરુદ્રયામલે ઉત્તરતન્ત્રે મહાતન્ત્રોદ્દીપને મૂલચક્રસારસઙ્કેતે
ભૈરવભૈરવીસંવાદે કન્દવાસિનીસ્તોત્રં નામ દ્વાત્રિંશઃ પટલઃ ॥ ૩૨॥

The numbers correspond to paTala and verse numbers from
Rudrayamala uttaratantra.

Proofread by Aruna Narayanan

*Kundalini Stotram 2 Kandavasini Stotram*
pdf was typeset on February 16, 2020

Please send corrections to *sanskrit@cheerful.com*